पालयिष्येऽस्य सन्तानं देवि ! त्वद्वचनादहम् ।
प्राग्ज्योतिषेऽभिषेक्ष्यामि नगारं भगदत्तकम् ॥
पृथिव्यां नारदेनैव सहितः केशवस्तदा ।
भगदत्तं भौमसुतं प्राग्ज्योतिषपुरोत्तमे ।
अभिषिच्य तदा भूपं पुरमध्ये न्यवेशयत् ॥”
इति कालिकापुराणे ३९ अध्यायः ॥
( यथा च महाभारते । २ । २६ । ८ ॥
“स तानपि महेष्वासान् विजित्य भरतर्षभ ! ।
तैरेव सहितैः सर्व्वैः प्राग्ज्योतिषमुपाद्रवत् ॥”
तत्र राजा महानासीद्भगदत्तो विशाम्पते ! ।
तेनासीत् सुमहद्युद्धं पाण्डवस्य महात्मनः ॥”)

भगदैवतं, क्ली, ( भगो योनिर्दैवतं देवता यस्य । ) पूर्व्वफल्गुनीनक्षत्रम् । तत्तु ह्रस्वतेजोनक्षत्रम् । यथा, ज्योतिस्तत्त्वे ।
“विशाखानलतोयानि वैष्णवं भगदैवतम् ।
पुष्या पौष्णो यमः सर्पो जन्मभाग्यकेतः
क्रमात् ॥”

भगन्दरः, पुं, ( भगं गुह्यमुष्कमध्यस्थानं दारयतीति । “दृ + णिच् + पूःसर्व्वयोर्दारिसहोः ।” ३ । २ । ४१ । इत्यत्र । “भगे च दारेरिति वक्तव्यम् ।” इति काशिकोक्तेः खच् । “खचि ह्रस्वः ।” ६ । ४ । ९४ । इति ह्रस्वः । मुमश्च । ) अपानदेशे व्रणरोगविशेषः । तस्य रूपमाह ।
“गुदस्य द्व्यङ्गुले क्षेत्रे पार्श्वतः पिड़कार्त्तिकृत् ।
भिन्नो भगन्दरो ज्ञेयः स च पञ्चविधो भवेत् ॥”
अर्त्तिकृत् पीड़ाकृत् । पञ्चविधः वातकपैत्तिकश्लैष्मिकसान्निपातिकशल्यजभेदैः ॥ भगन्दरशब्दस्य निरुक्तिमाह भोजः ।
“भगं परिसमन्ताद्यो गुदवस्तीं तथैव च ।
भगवद्दारयेद्यस्मात्तस्मादेष भगन्दरः ॥”
भजन्त्यनेनेति भगं मेहनम् । भजन्त्यस्मिन्निति भगं योनिः । अत्र भगशब्देन द्वयमपि कथ्यते । भगवत् योनिवत् ॥ पूर्व्वरूपादीनि यथा,—
“कटीकपालनिस्तोददाहकण्डुरुजादयः ।
भवन्ति पूर्व्वरूपाणि भविष्यति भगन्दरे ॥”
कटीकपालमत्र कटीफलकम् ॥ वातिकं शतपोनकसंज्ञं भगन्दरमाह ।
“कषायरूक्षैरतिकोपितोऽनिल-
स्त्वपानदेशे पिड़कां करोति याम् ।
उपेक्षणात् पाकमुपैति दारुणं
रुजाश्च भिन्नारुणफेनवाहिनीम् ॥
तत्रागमो मूत्रपुरीषरेतसां
व्रणैरनेकैः शतपोनकं वदेत् ।
दारुणं अतिदारुणात् । व्रणैरनेकैः सूक्ष्ममुखैः । शतपोनकश्चालनी तत्तुल्यम् ॥ पैत्तिकमुष्ट्रग्रीवसंज्ञमाह ।
“प्रकोपणैः पित्तमतिप्रकोपितं
करोति रक्तां पिड़कां गुदे गताम् ।
तदाशुपाकाहिमपूतिवाहिनीं
भगन्दरञ्चोष्ट्रशिरोधरं वदेत् ॥”
आशुपाकाहिमपूतिवाहिनीम् । शीघ्रपाकाम् उष्णदुर्गन्धवाहिनीञ्च । तदा तं भगन्दरं उष्ट्रशिरोधरं उष्ट्रग्रीवसंज्ञं वदेत् । उष्ट्रग्रीवसंज्ञश्च । पिड़काकालीनवक्रतयोष्ट्रग्रीवाकारत्वेन ॥ * ॥ श्लैष्मिकपरिस्राविसंज्ञमाह ।
“कण्डूयनो घनस्रावी कठिनो मन्दवेदनः ।
श्वेतावभासः कफजः परिस्रावी भगन्दरः ॥”
कठिनः पिड़कावस्थायां परिस्रावी निरन्तरं स्रवणशीलः ॥ * ॥ सान्निपातिकशम्बूकावर्त्तसंज्ञमाह ।
“बहुवर्णरुजास्रावा: पिड़का गोस्तनोपमाः ।
शम्बूकावर्त्तवन्नाड़ी शम्बूकावर्त्तको मतः ॥”
बहुवर्णरुजास्रावाः बहुशब्दो वर्णादिभिः प्रत्येकं सम्बध्यते । नाड़ी स्रावमार्गः ॥ * ॥ शल्यजमुन्मार्गसंज्ञमाह ।
“क्षताकृतिः पायुगताभिवर्द्धते
ह्युपेक्षणात् स्युः कृमयो विदार्य्यते ।
प्रकुर्व्वते मार्गमनेकधा मुखै-
र्व्रणैस्तमुन्मार्गिभगन्दरं वदेत् ॥
क्षतात् कण्टकादिना नखेन
कण्डूयनादिना वाभिघातात् ।
गतिः स्रावः उन्मार्गिभगन्दरम् । एतस्य कृमिकृतमार्गैः पुरीषादिनिर्गमादुन्मार्गिसंज्ञा ॥”
कष्टसाध्यमसाध्यञ्चाह ।
“घोराः साधयितुं दुःखाः सर्व्व एव भगन्दराः ।
तेष्वसाध्यस्त्रिदोषोत्थः क्षतजश्च विशेषतः ॥
वातमूत्रपुरीषाणि शुक्रञ्च कृमयस्तथा ।
भगन्दरात् स्रवन्तस्तु नाशयन्ति तमातुरम् ॥”
अथ भगन्दरस्य चिकित्सा । यथा,—
“अथास्य पिड़कामेव तथा यत्नादुपाचरेत् ।
शुद्ध्यस्रस्रुतिसेकाद्यैर्यथा पाकं न गच्छति ॥
पुनर्नवाम्लताशुण्ठीपिष्टिकावदरैः कृतः ।
लेपाय पिड़कावस्थे कल्कः शस्तो भगन्दरे ॥
पयःपिष्टैस्तिलारिष्टमधुकैः शीतलैः कृतः ।
लेपो भगन्दरे शस्तः पैत्तिके वेदनावति ॥”
अरिष्टो निम्बः ॥
“सुमनायाश्च पत्राणि गुड़ूची विश्वभेषजम् ।
सैन्धवं तक्रसंपिष्टं लेपाद्धन्ति भगन्दरम् ॥”
सुमना जातिस्तस्याः पत्रम् ।
“पिड़कानामपक्वानामपतर्पणपूर्व्वकम् ।
कर्म्म कुर्य्याद्विरेकान्तं भिन्नानां व्रणवत् क्रिया ॥
निशार्कक्षीरसिन्धूत्थपुराश्वहननच्छदैः ।
सिद्धमभ्यञ्जने तैलं भगन्दरहरं परम् ॥”
पुरो गुग्गुलुः । अश्वहननच्छदाः करवीरपत्राणि । निशादितैलम् ॥ * ॥
“त्रिफलापुरकृष्णानां त्रिपञ्चांशैकयोगिता ।
गुटिका शोथगुल्मार्शोभगन्दरवतां हिता ॥”
नववार्षिको गुग्गुलुः ॥ * ॥
“शस्त्रक्रियापि कथिता शस्त्रसाध्ये भगन्दरे ।
सा च तेनैव कर्त्तव्या शस्त्रशास्त्रमवैति यः ॥
व्यायामं मैथुनं युद्धं पृष्ठयानं गुरूणि च ।
रूढ़व्रणोऽपि यत्नेन वर्जयेद्वत्सरं नरः ॥”
इति भावप्रकाशे भगन्दराधिकारः ॥
अपि च ।
“लङ्घनं स्वेदनं लेपविम्लापनविरेचनैः ।
रक्तमोक्षादिभिः शीघ्रं गुदजां पिड़कां जयेत् ॥
तथा यत्नं भिषक् कुर्य्याद्यथा पाकं नियच्छति ।
अपक्वं वाथ पक्वं वा जलौकापातनं हितम् ॥
तदभावे तु शृङ्गाभ्यामिदं रक्तस्य मोक्षणम् ॥”
वटपत्रेष्टकाशुण्ठीगुड़ूच्यः सपुनर्नवाः ।
पिष्टा तु पिड़कारम्भे लेपः शस्तो भगन्दरे ॥
आमावस्थाक्रिया प्रोक्ता पक्वावस्थाक्रियोच्यते ॥
चुम्बणापाटलाक्षारवह्निदाहादिकं क्रमम् ।
विधाय व्रणवत् कार्य्यं यथा दोषो यथा बलम् ॥
स्नुह्यर्कदुग्धदार्व्वीभिर्वर्त्तिं कृत्वा भगन्दरे ।
दद्यात् सर्व्वशरीरस्था नाड़ीर्हन्यात् प्रयोगराट् ॥
तिलाभयालोध्रमरिष्टपत्रं
निशा वचा कुष्ठमगारधूमः ।
भगन्दरे नाड्युपदंशयोश्च
दुष्टव्रणे शोधनरोपणोऽयम् ॥
शुनोऽस्थिघृष्टं त्रिफलारसेन
विड़ालकास्थि त्वथवा विलेपनात् ।
चिरप्रभूतं व्रणरोगदुष्टं
भगन्दरं नाशमुपैति नूनम् ॥ * ॥
जम्बूकमांसं भुञ्जीत प्रकारैर्व्यञ्जनादिभिः ॥”
शृगालमांसव्यञ्जनं खाद्यम् । अथवा शम्बकमांसव्यञ्जनं खाद्यम् ॥
“त्रिकटु त्रिफला मुस्तं विड़ङ्गामृतचित्रकम् ।
शट्येला पिप्पलीमूलं हवुषा सुरदारु च ॥
तुम्बुरु पुष्करं चव्यं विशाला रजनीद्वयम् ।
विड़ं सौवर्च्चलक्षारौ सैन्धवं गजपिप्पली ॥
यावन्त्येतानि चूर्णानि तावद्द्विगुणगुग्गुलुः ।
कोलप्रमाणां गुटिकां खादयेन्मधुना सह ॥
भगन्दरं श्वासकासं क्षयं जीर्णज्वरोदरम् ।
नाड़ीदुष्टव्रणानाहकुष्ठोन्मादाश्मरीकृमीन् ॥
मेहान्त्रवृद्धिहृद्रोगशूलं श्लीपदमेव च ।
सप्तविंशतिको हन्ति गुग्गुलुः सर्व्वरोगहा ॥”
हृद्रोगशूलमित्यत्र हृत्पार्श्वशूलमित्यपि पाठः ॥
सप्तविंशतिगुग्गुलुः ॥ * ॥
“चित्रकार्कौ त्रिवृत्पाठौ मलपूहयमारकौ ।
सुधां वचां लाङ्गलिकां हरितालं सुवर्च्चलाम् ॥
ज्योतिष्मतीञ्च संचूर्ण्य तैलं वैद्यो विपाचयेत् ।
एतद्विस्यन्दनं नाम तैलमुक्तं भगन्दरे ॥
शोधनं रोपणञ्चैव सवर्णकरणं स्मृतम् ।”
विस्यन्दनतैलम् ॥ * ॥
“सूतस्य द्विगुणेन शुद्धबलिना कन्यापयोभि-
स्त्र्यहं
पिष्ट्वा ताम्रमयं समस्ततुलितं पात्रं विधायोपरि ।
स्वेद्यं यामयुगं सभस्मपिठरे जम्बूजलैः सप्तधा
साद्रं तत्पुटयेत् भगन्दरहरो गुञ्जोन्मिता
स्यादिति ॥”
जम्बूजलैरित्यत्र निम्बूजलैरिति च पाठः ।
भगन्दरहरो रसः ॥ * ॥
“शुद्धसूतं समं गन्धं मृतनागं सतुत्थकम् ।
जीरकं सैन्धवं तुल्यं तिक्तकोषातकीद्रवैः ॥